# Ganesha Stotram

# गणेशस्तोत्रम्

## Document Information

Text title : Ganesha Stotram

File name : gaNeshastotrambauddha.itx

Category : ganesha, buddha, stotra

Location : doc_ganesha

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# गणेशस्तोत्रम्

खर्वं स्थूलतरं गजेन्द्रवदनं लम्बोदरं सुन्दरं
विघ्नेशं मधुगन्धलुब्धमधुपव्यालोलगण्डस्थलम् ।
दन्तोद्घाटविदारिताहितजनं सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥ १॥

हेरम्बः परमो देवः कार्यसिद्धिविधायकः ।
सैभाग्यरूपसम्पन्नां देहि मे सुखसम्पदम् ॥ २॥

एकदन्तं महाकायं लम्बोदरं गजाननम् ।
सर्वसिद्धिप्रदातारं गङ्गापुत्रं नमाम्यहम् ॥ ३॥

वन्दे तं गणनाथमार्यमनघं दारिद्र्यदावानलं
शुण्डादण्डविधूयमानशमलं संसारसिन्धोस्तरिम् ।
यं नत्वा सुरकोटयः प्रभुवरं सिद्धिं लभन्ते परां
सिन्दूरारूणविग्रहं परिपतद्दानाम्बुधाराहृतम् ॥ ४॥

उच्चैर्ब्रह्माण्डखण्डद्वितयसहचरं कुम्भयुग्मं दधानः
प्रेषन्नागारिपक्षप्रतिभटविकटश्रोत्रतालाभिरामः ।
देवः शम्भोरपत्यं भुजगपतितनुस्पर्द्धिवर्धिष्णुहस्त-
स्त्रैलोक्याश्चर्यमूर्तिर्जयति त्रिजगतामीश्वरः कुञ्जरास्यः ॥ ५॥

गणपतिश्च हेरम्बो विघ्नराजो विनायकः ।
देवीपुत्रो महातेजा महाबलपराक्रमः ॥ ६॥

महोदरो महाकायश्चैकदन्तो गजाननः ।
श्वेतवस्त्रो महादीप्तस्त्रिनेत्रो गणनायकः ॥ ७॥

अक्षमालां च दन्तं च गृह्णन् वै दक्षिणे करे ।
परशुं मोदकपात्रं च वामहस्ते विधारयन् ॥ ८॥

नानापुष्परतो देवो नानागन्धानुलेपनः ।

नागयज्ञोपवीताङ्गो नानाविघ्नविनाशनः ॥ ९॥

देवासुरमनुष्याणां सिद्धगन्धर्ववन्दितम् ।
त्रैलोक्यविघ्नहर्तारमाखुवारूढं नमाम्यहम् ॥ १०॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो विनायकः ॥ ११॥

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
वक्रतुण्डः शूर्पकर्णो हेरम्बः स्कन्दपूर्वजः ॥ १२॥

षोडशैतानि नामानि यः पठेच्छ्रुणुयादपि ।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥ १३॥

सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ।
विघ्नवल्लीकुठाराय गणाधिपतये नमः ॥ १४॥

इति श्रीगणेशस्तोत्रं सम्पूर्णम् ॥

*Ganesha Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*